अनुस्वारविधिः—-अनुस्वारविधिं प्रति [1]अजादेशो न स्थानिवद् भवति । शिंषन्ति । पिंषन्ति । 'नश्चापदान्तस्य झलि' (८.३.२४/१२३) इति[2] अनुस्वारे कर्तव्ये श्नसोरल्लोपः (६.४.१११/२४६९) [3]न स्थानिवद् भवति[4] ।

दीर्घविधिः—-दीर्घविधिं प्रति [5]अजादेशो न स्थानिवद् भवति । प्रतिदीव्ना । प्रतिदीव्ने । [6]प्रतिदिवन् इत्येतस्य 'भस्य' (६.४.१२९/२३३) इत्यधिकृत्य तृतीयैकवचने[7] चतुर्थ्येकवचने च 'अल्लोपोऽनः' (६.४.१३४/२३४) इत्यकारलोपः परनिमित्तकः, तस्य स्थानिवद्भावाद् 'हलि च' (८.२.७७/३५४) [8]इति दीर्घत्वं न स्यात्, न ह्ययं वकारो हल्परः इति, अस्माद् वचनाद् भवति ।

जश्विधिः—-[9]जश्विधिं प्रत्यजादेशो न स्थानिवद् भवति । 'सग्धिश्च मे सपीतिश्च मे' (वा.सं. १८.९) । 'बब्धां ते हरी धानाः' (नि. ५.१२) । अदेः क्तिनि[10]'बहुलं छन्दसि' (२.४.३९/३३९८) इति घस्लादेशः । 'घसिभसोर्हलि च' (६.४.१००/३५५०) इत्युपधालोपः । 'झलो झलि' (८.२.२६/२२८१) इति सकारलोपः । 'झषस्तथोर्धोऽधः' (८.२.४०/२२८०) इति धत्वम् । उपधालोपस्य स्थानिवत्त्वात् 'झलां जश् झशि' (८.४.५३/५२) इति घकारस्य जश्त्वं न स्यात्, अस्माद् वचनाद् भवति । [11]समाना ग्धिः । समानस्य[12] सभावः । सग्धिः[13] । बब्धाम् इति भसेर्लोड्द्विवचने[14] शपः श्लुः, द्विर्वचनम्, अभ्यासकार्यम्, 'घसिभसोर्हलि च' (६.४.१००/३५५०)इति उपधालोपः, 'झलो झलि' (८.२.२६/२२८१) इति सकारलोपः, 'झषस्तथोर्धोऽधः' (८.२.४०/२२८०) इति धत्वम् । उपधालोपस्य स्थानिवत्त्वात् 'झलां जश् झशि' (८.४.५३/५२) इति[15] जश्त्वं न स्यात्, अस्माद् वचनाद् भवति[16] ।

चर्विधिः—-[17]चर्विधिं प्रति [18]अजादेशो न स्थानिवद् भवति । जक्षतुः । [19]जक्षुः । 'अक्षन् पितरोऽमीमदन्त[20] पितरः' (वा. सं. १९.३६)[21] । लिड्द्विवचनबहुवचनयोरदेर्घस्लादेशः । 'गमहनजनखनघसां लोपः क्ङित्यनङि (६.४.९८/२३६३) इति[22] उपधालोपः, द्विर्वचनम्, अभ्यासकार्यम् । तत्र उपधालोपस्य [23]स्थानिवत्त्वात् 'खरि च' (८.४.५५/१२१) इति घकारस्य चर्त्वं न [24]स्याद्, अस्माद् वचनाद् भवति[25] । '[26]शासिवसिघसीनां च' (८.३.६०/२४१०) [27]इति षत्वम् । अक्षन् इति अदेः [28]लुङ्बहुवचने घस्लादेशः, [29]च्लेरागतस्य 'मन्त्रे घसह्वर०' (२.४.८०/३४०२) इति लुक् । 'गमहनजनखनघसां लोपः क्ङित्यनङि' (६.४.९८/२३६३) इत्युपधालोपः, तस्य [30]स्थानिवत्त्वात् 'खरि च' (८.४.५५/१२१) इति चर्त्वं न स्यात्, अस्माद् वचनाद् भवति[31] ।

स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवद् भवति । [32]अन्यत्र स्थानिवदेव । [33]तेन [34]बहुखट्वकः, [35]किर्योः, गिर्योः, वाय्वोः इति [36]स्थानिवत्त्वात् [37]स्वरदीर्घयलोपा न भवन्ति ॥

---

1. अजादेशः नास्ति अ.ग. ड. फ. ह. 2. इति नास्ति क. 3. इति उक्तलक्षणेन इत्यधिकम् ह. 4. भवति नास्ति क. 5. अजादेशो नास्ति क. ग. ड. फ. ह. 6. प्रतिदिवन् नास्ति ह, एतस्य नास्ति फ. 7. कृते इत्यधिकम् अ. 8. उपधायां च फ, उपधायाश्च ग. ह. 9. जश्त्वविधि ह, अजादेशः नास्ति ह. 10. कृते इत्यधिकम् फ. 11. समाना चासौ जग्धिश्च ह. 12. छन्दसि अमूर्धप्रभृत्युदकेष्विति इत्यधिकम् ह. 13. नास्ति अ. 14. तसस्तामि क. ड, तामादेशः अ, द्विवचनं तां ई. 15. भस्य ह, धकारस्य क. ड. 16. बब्धाम् इति इत्यधिकम् ह. 17 चर्तुविधि ग. 18 अजादेशः नास्ति क. ड. ह. 19. जरक्षुः ग. 20. हि इत्यधिकम् ग. 21. इति फ. 22. इत्यादिना ह. 23. स्थानिवद्भावात् ग. ह. 24. स्याद् नास्ति ह. 25. शासिवसि–भवति नास्ति ग. ह. 26. इत्यनेन ड. 27. जक्षतुः जक्षुः जक्षन् इत्यधिकम् ह. 28. लुङि क. ड. फ. 29. श्लेरङ्गस्य फ. 30. स्थानिवद्भ।वात् अ. 31. अक्षन् इत्यधिकम् ई. 32. अन्यश्च ड. फ. 33. तेन नास्ति फ. 34. बहुमालकः फ. ह. 35. शिर्पोः ग. 36. स्थानिवद्भावात् ह, नास्ति फ. 37. स्वरदीर्घलोपाः ह.